National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(35): 50-51
© 2021 NJHSR
www.sanskritarticle.com

**डॉ.अञ्जली कबाट**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्द्रप्रदेशः

**Correspondence:**
**डॉ.अञ्जली कबाट**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्द्रप्रदेशः

# आत्मदूतकाव्ये दार्शनिकपरिशीलनम्

**डॉ.अञ्जली कबाट**

**DOI:** https://doi.org/10.5281/zenodo.19789834

साहित्यं भावप्रधानं भवति, दर्शनं च चिन्ताप्रधानमित्युच्यते। दर्शनं नाम परमात्मतत्त्वस्यानुचिन्तनसोपानम्, आध्यात्मिकतत्त्वस्य परिशीलनमार्ग, "मनोविश्लेषणस्य परिक्षणागार"। एतद्दर्शनं भारतीयसंस्कृतसाहित्ये द्विधा विभक्तम् – आस्तिकदर्शनं, नास्तिकदर्शनशञ्चेति। तत्र आस्तिकाः वेदसमर्थकाः, ईश्वरविश्वासिनो भवन्ति। नास्तिकास्तु यद्यपि ईश्वरं विश्वसन्ति, तथापि वेदस्योपरि, वेदविहितकर्मणामुपरि तेषां विश्वासः नास्ति। केचन नास्तिकाः ईश्वरं विश्वरमेव नाङ्गीकुर्वन्ति। तत्र आस्तिकदर्शनेषु न्याय – वैशेषि – सांख्य – योग – पूर्वमीमांसा – वेदान्ताख्यानि षट्दर्शनानि प्रसिद्धानि। ये नास्तिकास्तेषु चार्वाकः, बौद्धः, जैनः इत्यादयः प्रमुखाः।

प्रकृतकाव्ये आत्मदूते सांख्यादिदर्शनरहस्यानि स्थलविशेषु सहृदयैराकलयितुं शक्यन्ते। साधारणतः दर्शनमाध्यात्मिकतत्त्वस्य प्रतिपादकं भवति ।अत्र जीवजगतोरुत्पत्तिविषये चर्चा क्रियते। आत्मा, मनः, इन्द्रियाणि, महाभूतानि इत्यादीनि अत्र प्रामुख्येन परामृश्यन्ते। प्रकृतकाव्ये आत्मदूते शुद्धचैतनस्य आत्मनः दूतत्वेन प्रतिपादनं दार्शनिकसिद्धान्तस्य एव परिचायकं भवति।

**अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः** ।। [१] ( सां.द. - १/१ )

सांख्ययोगे त्रीणि दुःखानि प्रोक्तानि। यथा – भूतेभ्यः जातं सर्पदंशाद्याभौतिकदुःखम्, देवेभ्यो जातमशनपाताद्याधिदैविकदुःखम्, जराव्याधिजनितशारीरकं दुर्जनसङ्गतिस्वजनविरहजनित-मानसिकं चाध्यात्मिकं दुःखञ्चेति। एतेषां त्रिविधानां दुःखानां निवृत्तिः मनसि सांसारिकविषयवासनाभ्यः दूरे स्थिते सति आस्तिकभावनायाः जागरणेन सम्भवति। तदुक्तं कविना–

**गार्हस्थ्यींकण्टकमिव ततो निन्द्यते योगभिस्तत्**
**नारीरत्नं सकलसुखदं संयमी चेन्नरः स्यात्।**
**स्रष्टुः सृष्टिस्थितिलयगुणेष्वास्तिकत्वं स्वचित्ते**
**संस्थाप्यास्मिन् जगति चलतो नास्ति दुःखं जनस्य।।** [२]

( आ . दू . - १/७ )

दर्शनशास्त्रे आस्तिकाः ईश्वरविश्वासिनः, वेदविहितकर्मनिष्ठाः भवन्ति इति प्रतिपाद्यन्ते। तदाधारेणापि दर्शनवाङ्मयस्य आस्तिकनास्तिकभेदेन द्विधा विभागः क्रियते ।

दर्शनेषु सांख्यदर्शनं योगदर्शनं च प्रकृतिपुरुषयोः सत्तां निरूपयतः । तत्र प्रकृतिः गुणवती अस्ति। अत्र सत्त्वरजस्तमसां साम्यं वैषम्यं च परिलक्ष्यते । परन्तु पुरुषः निर्गुणः ब्रह्मरूपः कथ्यते। साख्यदर्शनस्य वेत्ता कविः उमाकान्तः एवं प्रकृतिपुरुषयोः पुरुषस्वरूपं भारतवर्षस्य वर्णनावसरे उल्लिखति। यथा–

**मध्येबिन्ध्यो दशरथसुनोः कीर्त्तिमाख्याति शश्वत्**
**कृष्णागोदातपनतनया जाह्नवी सेविता भूः।**
**अस्त्यास्याः श्रीपरमपुरूषो निर्गुणो ब्रह्मरूपः**
**नाथो विस्तारयति नितरां तत्कथां प्राक् शृणु त्वम्।।**[३]
( आ . दू . - १/९ )

सृष्टेः मूलभूते प्रकृतिपुरुषौ मूलभूतौ इति उच्यते । यथा –

**काले काले प्रकृतिपुरुषौल मूलभूतौ हि सृष्टेः**
**एतद्धर्मः प्रचलति सदा भारतीये समाजे ।।**[४]
( आ . दू . - १/१४ )

वेदान्तदर्शने "जीवो ब्रह्मौव नापरः" इति अद्वैतवादः उपन्यस्तोऽस्ति। "तत्त्वमसि" इति वाक्यमपि वेदान्तदर्शनस्य महावाक्येषु अन्यद्भवति। आत्मपरमात्मनोः ऐक्यमत्र प्रतिपाद्यते। अयं सिद्धान्तः कविना उमाकान्तपण्डामहोदयेन आत्मदूतकाव्ये उपश्लोकयति। यथा –

**यो यत्र तिष्ठतु नरः परमात्मनः सः**
**एकांश एव परमो विधिरेव कर्ता।**
**जीवोऽपि तत्त्वमसि नेतर ईश्वरेणु**
**सृष्टा च सृष्टिरमृतेन सदैव पूर्णा।।**[५]
( आ . दू . - २/१७ )

वेदान्तदर्शने पञ्चीकरणप्रक्रियया पञ्चमहाभूतैः पृथिवी – अप् – तेजो – वायु – आकाशैः जीवशरीरस्य निर्माणं भवति इति उच्यते। तदेव कविः कथयति यत् सकलं जन्तुशरीरं भूतोद्भवं भवति , अन्ते च भूतेषु एव विलीयते । यथा -

**कस्याप्यभवमिह पूरयते न कालः**
**भूतोद्भवं सकलजन्तुगतं शरीरम् ।**
**भूतेषु याति विलयं गुणकर्मजालं**
**तिष्ठेच्चिरं क्षितितले कनकाक्षणे।।**[६]
( आ . दू . - ३/१२ )

चिरन्तनशाश्वतसुखप्राप्त्यर्थमात्मदर्शनं, वाचां प्रयोगविषये योगनिर्दिष्टाष्टाङ्गमार्गेषु प्रथमयोगमार्गस्य यमस्य परिपालनं करणीयमिति कविना सूच्यते। यथा –

**आत्मा सदा मतिमतामिह दर्शनीयः**
**वाचां प्रयोगविषये यमो विधेयः।**
**निष्कामकर्म करणीयमनेन धातुः**
**सृष्टौ मिलिष्यति सदा सुफलं हि नाऽन्यत्।।**[७]
( आ . दू . - ३/२५ )

योगशास्त्रे क्लेशः प्रमुखः निराकरणविषये इति प्रतिपाद्यते। अविद्या, रागः, द्वेषः, अभिनिवेशः इति भेदेन अयं क्लेषः पञ्चधा विभज्यते। एते सर्वेऽपि विषयाः "आत्मदूतम्" इति काव्ये प्रधानाः आलोच्यविषयाः भवन्ति।

सांख्यदर्शने प्रकृतिः शरीरम्, पुरुषश्च आत्मा इति कथ्यते। प्रकृतिः त्रिगुणात्मिका, विवेकवती, विषयरूपा, सामान्या, अचेतना, प्रसवधर्मिणी इति कथ्यते। पुरुषस्तु तद्विपरीतः। उभययोः मध्ये पङ्ग्वन्धवत्सम्बन्धः वर्तते। प्रकृतिः अन्धस्वरूपा पुरुषश्च द्रष्टा। शरीराधिष्ठितः चैतन्यरूपः अयं पुरुषः सर्वेषां शरीरेण प्रवर्तितानां कर्मणां साक्षीति उच्यते पुरुषः। अयं दार्शनिकसिद्धान्तः आत्मदूतकाव्येऽपि द्रष्टुं शक्यते। असत्कर्मणि प्रवृत्तानां मानवानां कर्मसाक्षिभूतं परमात्मानं प्रति भीतिः नास्ति इति प्रतिपादयन् कविःलिखति -

**देहेषु देही कृतकर्मसाक्षी**
**ज्ञात्वाऽपि सत्कर्मसु मानवानाम्।**
**दृष्ट्वा प्रवृत्तिं विनयेन सार्द्धं**
**वदामि भो ! रक्षत मानवत्वम्।।**[८]
( आ .दू . - ४/२८ )

आत्मदूते चार्वाकसिद्धान्तः अपि वर्तते। चार्वाकेण –

**यावज्जीवेत्सुखं जीवेद् ऋणं कृत्वा घृतं पिवेत्।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।**

कविः उमाकान्तः अस्मिन् प्रसङ्गे लिखति –

**वित्तेन धीर्भवति विक्रय आपणेषु**
**वित्तं हि यच्छति सुखं सुखिनोऽर्थिनो वै।**
**देहे स्थिते सति सुखं न सुखं मृतेऽस्मिन्**
**एवं प्रथा चलति यत्र किमत्र शान्ति।।**[९]
( आ .दू . - २/२८ )

एवंप्रकारेण काव्येऽस्मिन् वेदान्त – सांख्य – योग – दर्शनतत्त्वानि कविना बहुधा आलोचितानि वर्तन्ते। सर्वोपरि मानवतावादस्य विशिष्टचर्चाऽत्र क्रियते, यस्य वादस्य प्रमुखं लक्ष्यं भवति मानवस्य चिरन्तनशाश्वतसुखसम्पादनम्। समुहस्वार्थेषु वैयक्तिकस्वार्थम्, वैयक्तिकस्वार्थे च समूहस्वार्थं प्रतिपादयितुं कविः काव्येऽस्मिन् प्रयासं करोति। भौतिकवस्तुनां प्रति जनानामाकर्षणम्, धर्ममार्गात्तेषां विच्युतिः, स्वार्थायानैतिका-चरणम् इत्यादीनां विषयाणां विश्लेषणं कृत्वा कविः परमात्मनः मार्गानुसरणं, मानवेषु पशुत्वं निष्कास्य मानवतायाः संस्थापनं कर्त्तुं यः दार्शनिकः प्रयासः कृतः स सर्वदा अविस्मरणीयः, अनुसर्तव्यश्च।

**सहायकग्रन्थसूची**

१. सांख्यदर्शनम् – कपिलमुनिः – चौखम्भा संस्कृत संस्थान - २०१३।
२. आत्मदूतम् – उमाकान्तपण्डा – रेमुणागोलेइ, बालेश्वर, प्रथमसंस्करणम् - २००६।